# विद्यालयेष्वध्यापनरतानामध्यापिकानां सांस्कृतिकचेतनायाः समीक्षा

**प्रतिभा**

**शोधच्छात्रा, केन्दीयसंस्कृतविश्वविद्यालयः, परिसरः-भोपाल।**

**Article Info**
Volume 5, Issue 5
Page Number : 01-04

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 05 Sep 2022

**शोधसारांशः** – समाजस्थानां मनुष्याणां जीवनं कैश्चित् सुनिर्दिष्टैः आचारैः विचारैश्च नियन्त्रितं भवति। तेषामेव विचाराचाराणां समूहः भारतीयसमाजे संस्कृतिरित्युच्यते। समाजेऽस्मिन् निवसतां मानवानां संस्काराः तथा परम्पराः स्थानभेदे भिद्यन्ते। ते संस्कारास्तथा ताः एव परम्पराः सामूहिकरूपेण संस्कृतिरिति। स्वप्रदेशीयसंस्कृतिज्ञाः अध्यापिकाध्यापकाः विविधसांस्कृतिकानुष्ठानोत्सवैः छात्रेषु स्वपरम्परां प्रति सजागत्वं तथा संस्कृतिं प्रति आन्तरिकचैतन्यं विस्तारयितुं समर्थाः। ते एव छात्रान् स्वस्थानीयभोजन-पेय-वस्त्र-उत्सवादिरूपां संस्कृतिं ज्ञातुं प्रेरयन्ति। तथा तस्मिन् समाजे समृद्धैकसांस्कृतिकवातावरणस्य निर्माणे सहायकाः भवन्ति।

**मुख्यशब्दः** - शिक्षा, संस्कृतिः, अध्यापिका, विद्यार्थी।

समाजशास्त्रेषु मनुष्याः सामाजिकप्राणित्वेन कथिताः। तेषां मनुजनूनां केचन आचार-विचार-व्यवहाराः सन्ति। ते एव व्यवहाराः संस्कृतिरिति कथ्यन्ते। शरीरे वस्त्रपरिधानात् प्रारभ्य आत्मनि अनात्मनः निराकरणं यावत् यानि कर्माणि आचर्यन्ते तानि सर्वान्येव संस्कृतौ समाहितानि। संस्क्रियते अनया सा संस्कृतिः इति व्युत्पत्या सम्-पूर्वकात् कृ-धातोः क्तिन्-प्रत्यये संस्कृतिशब्दः सम्पन्नः। डाँ. सम्पूर्णानन्दस्य मतानुसारेण - सा संस्कृतिः कथ्यते यया समुदायविशेषस्य जीवनसमस्यानां पर्यावेक्षणं क्रियते। राजागोपालाचार्यनये - कस्या अपि जातेः कस्यापि राष्ट्रस्य वा शिष्टपुरुषाणां विचार-वाणी-क्रियानां यत्स्वरूपं व्याप्तं सा संस्कृतिः।

अस्य संस्कृतिशब्दस्य प्रयोगः नैकेषु अर्थेषु क्रियते। परं व्यवहारशास्त्रे शब्दोऽयं विशिष्टैकार्थे प्रयुक्तः, यस्तु तस्य आधारभूतसिद्धान्तत्वेन स्वीकृतः। यतो हि मानवाः संस्कृत्या सह न जायन्ते, अपि तु तेषु संस्कृतिग्रहणाय नैसर्गिकी शक्तिः विद्यते। ते तया शिक्षां गृह्णन्ति। मनुष्याणां एषा शिक्षणप्रक्रिया संस्कृतीकरणमिति कथ्यते। संस्कृतेरुद्भवः मानवजीवनस्य मनोवैज्ञानिक-ऐतिहासिकाङ्गादेव। तथा तस्याः निरूपणे विकाशे च तेषामेव तत्त्वानां (मनोवैज्ञानिक-ऐतिहासिकानाम्) उपयोगः दरीदृश्यते। संस्कृतिसंरचनायां केचन विशिष्टभागाः विद्यन्ते। तेषु भागेषु लघुतमभागो हि सांस्कृतिकतत्त्वमिति कथ्यते। नैकानि तत्त्वानि मिलित्वा यथा तत्त्वसमूहो जायते तथैव एकस्यां संस्कृतौ बहूनि सांस्कृतिकतत्त्वानि समाविष्टानि। किञ्च नैकासु संस्कृतिषु एकाधिकः प्रेरकसिद्धान्तः दृश्यते येन ताः विशिष्टतां गच्छन्ति। एतासु विशिष्टतासु अन्तर्गताः भारतीयार्यादिसंस्कृतयः एव भौतिकसंस्कृति-सामाजिकसंस्था-धर्म-कला-लोकवार्तादिरूपेण परिचीयन्ते, यस्य प्रमाणं वेदेषु उपनिषत्सु वेदाङ्गेषु तथा ऐतिहासिकधार्मिकादिशास्त्रेषु परिलक्ष्यते। तथाहि पठितं –

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।**[1] इति।

संस्कृतेः स्वरूपे प्रक्रियायां तथा तस्याः संगठने एका नियमबद्धता दृश्यते। यया तस्याः वैज्ञानिकविश्लेषणं सम्भाव्यते। संस्कृतिः मानवजीवनस्य बाह्यवस्तु तथा आभूषणं न, यस्याः व्यवहारः यथेच्छं कर्तुं शक्यते। संस्कृतिः सा वैशिष्टा यया मनुष्याः मनुष्यत्वं प्राप्नुवन्ति। ऋते संस्कृतिं मनुष्यानां संकल्पना अशक्या। परम्परया विश्वासेन जीवनशैल्या आध्यात्मिकत्वेन तथा भौतिकपक्षेण निरन्तरतया युक्ता संस्कृतिः मनुष्यान् जीवनस्यार्थं तथा जीवनातिवाहनस्य प्रक्रियां शिक्षयति। संस्कृतेः मौलिकतत्त्वमेकं हि धार्मिकविश्वासः तथा तस्य प्रतीकात्मकाभिव्यक्तिः। अतः धार्मिकविश्वासस्य सम्मानपूर्वकं समसामयिकप्रयत्नानां परिज्ञानमपि आवश्यकं, येन सांस्कृतिकवार्तालापः सम्भाव्यते। तेन अधिकाधिकतया मनुष्याः वैश्विकाः भवन्ति। किञ्च एतेन सांस्कृतिकजागरूकतायाः विस्तारोऽपि अधिकाधिकतया एधते। तथा विभिन्नसांस्कृतिकपरम्परायाः नूतनाः विषयाः ज्ञायन्ते।

मनुष्यानां सांस्कृतिक-सामाजिकान्तःक्रियायाः तथा सामाजिकार्थिकव्यवहारस्य उत्प्रेरकप्रतिमानानां समुच्चयः हि संस्कृतिः। समुच्चयेऽस्मिन् ज्ञानं विज्ञानं आस्था नैतिकमूल्यं प्रथा चेत्यादयः समाविष्टाः। संस्कृत्या प्रकृष्टनैतिकसाधनानां तथा उत्कृष्टसामाजिकार्थिक - राजनैतिकप्रचेष्टानां समष्टिगताभिव्यक्तिः मनुष्यानाम् आध्यात्मिकाभ्युदये कारका भवति।

संस्कृत्या एव सांस्कृतिकपरम्पराविषये मनुष्यानां जागरूकता तनोति। सांस्कृतिकजागरणेन हि मनुष्याः स्ववैयक्तिक-सामाजिकजीवनस्वरूपस्य निर्माणे निर्देशने नियमने तथा नियन्त्रणे सक्षमाः भवन्ति। प्रत्येकसंस्कृतौ सांस्कृतिकजागरूकतया चयनक्षमता तथा वरणात्मकस्य सामान्यसिद्धान्ताः समाविष्टाः।

संस्कृतिः न प्रकृतिप्रदत्ता, सा तु समाजीकरणस्य प्रक्रियया अर्ज्यते। अतः सांस्कृतिकपरम्परा तैः एव संस्कारैः सम्बद्धा ये तु मनुष्यानां वंशपरम्परायाः तथा सामाजिकपरम्परायाः संरक्षणसाधनाः। तच्च उत्तराधिकारबलात् उत्तरोत्तरं निगम्यते। तस्य च निगमनस्य नैरन्तर्ये संस्कृतेः अस्तित्वं निहितम्। येन नवीनादर्शाः सञ्ज्ञायन्ते। तैरेव आदर्शैः बाह्यक्रियानां तथा मनोवैज्ञानिकदृष्टिकोणस्य समावेशनं सम्भाव्यते। अतः संस्कृतिः सांस्कृतिकजागरूकता एव सामाजिकसंरचनायाः तथा वैयक्तिकजीवनपद्धतेः उपस्थापका।

संस्कृतेः पक्षद्वयं वर्तते - आधिभौतिकसंस्कृतिः तथा भौतिकसंस्कृतिश्च। सामान्येन आधिभौतिकसंस्कृतिः संस्कृतिरिति तथा भौतिकसंस्कृतिः सभ्यता इत्यभिधीयते। पक्षद्वयं परस्परात् भिन्नम्। संस्कृतिः आन्तरिकी, यस्यां परम्परागतचिन्तनं कलात्मकानुभूतिः विस्तृतज्ञानं धार्मिकास्था चेत्यादयः समाविष्टाः। किञ्च मनुस्मृतौ आचार्यमनुना कथितं -

**एतद्देश प्रसूतस्य सकाशादग्रजन्मना।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वे मानवाः॥**[2] इति।

यद्यपि भारतवर्षः एको बहुसांस्कृतिकदेशः। देशेऽस्मिन् नैकाः संस्कृतयः उद्भूताः। किञ्च अत्र प्रतिवेशिदेशस्य रीतयः परम्पराः विचाराः काले काले समावेशिताः। एतासां परम्पराणां पारम्परिकतायाः संरक्षणे सांस्कृतिकजागरूकता अत्यावश्यकी।

मनुष्येषु सांस्कृतिकजागरूकतायाः वर्धने विद्यालयानां सर्वकारीयसंस्थानां तथा असर्वकारीयसंस्थानां कर्तव्यं संलक्ष्यते। प्राचीनकालादेव आश्रम-मठ-गुरुकुलादिषु अध्यापनरतानाम् आचार्याणाम् उत्तरदायित्वमेव आसीत्

---

1 शिक्षा एवं संस्कृतिः नये सन्दर्भ

2 मनुस्मृतिः

सांस्कृतिकपरम्पराणां प्रचार: प्रसारश्च। येन समाजेऽस्मिन् कुरीत्या परिव्याप्ता: भ्रष्टाचारा: सुनिर्दिष्टेन सांस्कृतिकमूल्येन दूरीकृता:। तथाहि उक्तं गीतायां –

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।**

**युक्तस्वप्नावबोधस्य योगो भवति दु:खहा ॥**[3] इति।

इयं परम्परा अद्यापि विद्यालयेषु दरीदृश्यते। गृहेषु स्थित्वा वा विद्यालयादिसंस्थासु स्थित्वा वा नार्य: मनुजनुनां सांस्कृतिकजागरणे कार्यरता: भवन्ति। विद्यालयेषु अध्यापनरता: अध्यापिका: सांस्कृतिककार्यविधौ सर्वदा सचेष्टा: दृश्यन्ते।

प्राथमिकेषु तथा माध्यमिकेषु विद्यालयेषु कार्यरता: अध्यापिका: स्वतन्त्रतादिवस-गान्धीजयन्ती-गणतन्त्रदिवसादिराष्टियपर्वसु सोल्लासं उज्जापयन्ति। किञ्च छात्रानपि प्रेरयन्ति। एतदतिरिच्यापि स्वराज्यस्य स्वक्षेत्रस्य स्थानीयोत्सवविषये परिचयं कारयन्ति। दीपावली-गणेशचतुर्थी-होलिका-रक्षाबन्धनाद्युत्सवान् आधारीकृत्य छात्रै: अभिनीतेन नाटकेन जनेषु सांस्कृतिकजागरूकतां विस्तारयन्ति। जाति-धर्म-वर्णनिर्विशेषेण जनै: आचरितानि धर्मानुष्ठानानि यथा – दीपावली-बुद्धपुर्णिमा-रमजान-ख्रीसमास- इत्यादीनि आश्रित्य नाटकाभिनयेन मनुष्यान् सजागीकृत्य प्रेमभावस्य सन्देशं प्रेषयन्ति। पठितं हि –

**अयं निज:परो वेति गणना लघुचेतसाम् ।**

**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**[4] इति।

प्राथमिकमाध्यमिकविद्यालयेषु कार्यरता: अध्यापिका: शैक्षिककार्यविधिना सहैव क्षेत्रियनृत्यं तथा लोकगीतीं प्रति समाजस्थानां मनुष्यानां ध्यानमाकर्ष्य तस्य तस्य माहात्म्यं ज्ञापयन्ति। किञ्च विद्यालयेषु समायोजितेन अनुष्ठानेन स्वराज्यस्य स्वक्षेत्रियस्य वा परिधानवस्त्र-भाषा-भोज्य-नृत्य-उत्सव-धर्मादिं प्रति छात्रान् सजागीकृत्य ता: अपि तं प्रति सम्मानं व्याहरन्ति। एवं प्रकारेण सांस्कृतिकजागरूकतया एव शिक्षका: शिक्षिकाश्च भारतीयविविधसांस्कृतिकपर्यावरणेन परिचिता: स्यु:।

**सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दु:खभाग्भवेत्॥**[5]

इति सत्यशिवसुन्दरभावं समाजे विस्तारयन्ति ता:।

सांस्कृतिकविविधताम् आश्रित्य आयोजितया कार्यशालया अध्यापिकेषु विविधराज्यस्थानां तथा विविधक्षेत्रस्थानां मनुष्यानां धर्म-जाति-संस्कृतीत्यादीन् प्रति सम्मानस्य भावं जागृह्य ता: दायित्वशीला: नागरिका: कर्तुं शक्यते। तथाहि CENTRE FOR CULTURAL RESOURCES AND TRAINING इति संस्था भारतवर्षस्य प्रायेण प्रत्येकस्मिन् प्रान्ते प्राथमिक-माध्यमिक-उच्चतरमाध्यमिकविद्यालयेषु सेवारतानां अध्यापिकाध्यापकानां कृत् सांस्कृतिकविषयवस्तुसम्बन्धयुक्तां कार्यशालां समायोजयति। अस्या: कार्यशालाया: उद्देश्यानि हि –

- ✓ भारतीयां प्राकृतिक-सांस्कृतिकपरम्परां प्रति जागरूकताया: वर्धनम्।
- ✓ वर्गप्रशिक्षणे रचनात्मककार्याय नवीनपद्धतीनां विकाश: परीक्षा च।
- ✓ शिक्षां प्रति सहायकसामग्रीरूपेण विशिष्टकलाशैलीनां तथा पुत्तलिकाकलानाम् उपयोग:।

---

3 गीता

4 सामाजिक शिक्षा की अवधारणा (PAGE NO – 80)

5 अथर्ववेद:

अतः अध्यापिकाः यदि स्वकला-संस्कृति-धर्मादीन् प्रति सम्पूर्णरुपेण जागरूकाः भवेयुः तदैव छात्राणां तथा समाजस्य जागरणे ताः सहायकाः स्युः। यतो हि विद्यालयेषु अधीयानाः छात्राः एव भविष्यदाधारत्वेन स्वीकृताः।

-: **ग्रन्थसूची** :-


1. सामाजिक शिक्षा की अवधारणा, महेश भार्गव, निशी गोयेल, राखी प्रकाशन, 2011
2. शिक्षा एवं संस्कृतिः नये सन्दर्भ, डाँ. भास्कर मिश्र, भावना प्रकाशन,1995
3. भारतीय शिक्षा का समाजशास्त्र, डाँ. सत्यपाल रुहेला, राजस्थान हिन्दी ग्रन्थ अकादमी, 2009
4. सामाजिक परिवर्तन, सुरजन सिंह शर्मा, आर. एन. द्विवेदी, हरियाणा साहित्य अकादमी, पंचकूला, 2007
5. महिला विकास एक मूल्यांकन, प्रो. मधुसूदन त्रिपाठी, ओमेगा पब्लिकेशन्स, 2010